श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीरङ्गरामानुजमहादेशिकैः (श्रीमुष्णं आण्डवन्) अनुगृहीतं

# ॥ श्री कमलाधोदक स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कमलाधोदक स्तोत्रम् ॥

वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्मसरसीरुह भृङ्गराजम्।
त्रैय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्गलक्ष्मण मुनिं शरणं प्रपद्ये॥

कमलाममलांकमनीयबलां
अबलाजनतानतपादयुगाम्।
ममबोधकरांमदपापहरां
मनवैहृदयेसदयांनितराम्॥ **1** ॥

सगणैर्दुरितैर्विततैस्सहितं
सुगुणैर्महितैर्विविधैरहितम्।
कुरुमाममलंममपापमुषी
भवसागरजेभवतापहरी॥ **2** ॥

उदितामदितेर्मनसानुगतां
सुरतापहरांबहुदोषमुषीम्।
मुदितांश्रुतिभिःकथितांमनवै
हरिवत्सगुणांहरपापहराम्॥ **3** ॥

कलिकेलिहरींकरुणालहरीं
मलजालहरींमहनीयमहाम्।
महिलाकुलदोषहरींमहितां
कलयेसततंहरिणासहिताम्॥ **4** ॥

मतिदांगतिदांरतिदांनुतिदां
पतिदांविधिदांमहितांविहिताम्।
उडुपाधिपसोदरकान्तिमुखीं
कलयेविपुलांप्रबलांसफलाम्॥ 5 ॥

मलयानिलशीतलदृष्टिमतीं
मधुसूदनमानसहंसगतिम्।
मिहिरारुणकान्तिमतींकलये
कलमारुणपादवतींयुवतीम्॥ 6 ॥

अरुणांतरुणांवरणीयपदां
करुणावरुणालयभूतमताम्।
नमतांसमतांवहतींबृहतीं
अमितातुलवैभवशालिनिधिम्॥ 7 ॥

कृपयाभरितांनृपलोकहितां
निखिलागमवेदनुतांहितदाम्।
कुटिलालकपङ्क्तिमतींबृहतीं
निटिलाक्षसतीनतपादयुगाम्॥ 8 ॥

सरसीरुहदृष्टियुतांजयदां
हरिणीमनुरागयुतांहसतीम्।
दुरिताद्रिविभेदकवीक्षणदां
प्रतिभाप्रतिमांपृथुलांकलये॥ 9 ॥

तपनीयनिभांमहनीयशुभां
स्तवनीयगुणांकमनीयकृपाम्।
धनपांघनपांखगपांमखपां
मृगपामृतपांमनवैगृहपाम्॥ 10 ॥

विविधैर्विबुधैर्नुतिभिर्विनुतां
    ससुधोदयजन्मवतींसुमतिम्।
गजनादविबोधवतींजलजां
    अजशूलिमहेन्द्रनुतांसततम्॥ **11** ॥

सुदयासहितांसुधयाजनितां
    उदयाचलभूतिकरीमचलाम्।
मुनिशापहतंत्रिदशेन्द्रपदं
    परयाकृपयापरिपालयतीम्॥ **12** ॥

अहिभोगशयामखिलात्मवतीं
    गरुतांमरुतांगतिपांमतिपाम्।
गुरुदासजनैरुरुमात्रतया
    प्रथितांग्रथितांसगणैस्सुगुणैः॥ **13** ॥

कलवाग्बलभाग्फलभाङ्गितरां
    भवतीहजनोभवतीपदगः।
सकलाभरणाभरणांरमणीं
    प्रकृतिंविकृतिंप्रणमामिरमाम्॥ **14** ॥

दनुजैर्मनुजैस्तनुजैरदिते
    र्विनतातनयैर्विनुतांविनताम्।
नवनीरदनीलतनौलसतीं
    हसतींहिसतींहरितोषकरीम्॥ **15** ॥

वरदाभयहस्तयुतांभजतां
    द्विरदाधिपसेवितपादयुगाम्।
प्रमदागणशेखरमोदवतीं
    प्रणमामिसदाशरणागतपाम्॥ **16** ॥

करवालदलैःकरवीर्ययुतैः
    रणभूमिगतैर्विहिताभ्युदयाम्।
अवधीरितनीचकुलांसततं
    अवधारितसद्गुणकेलिमतीम्॥ **17** ॥

धनधान्यकरींधनदादिनुतां
    वनकान्तिकरींमुनिमोदकरीम्।
अधुनामधुनाविधिनानियतं
    भजनीयपदांममतारहिताम्॥ **18** ॥

रतिकोटिसमांविधिकोटिनुतां
    बहुकोटिविधैर्निधिभिस्सहितां।
यजनैर्भजनैर्यतिराजवरै -
    र्भुवनेमहितांपरमांहिरमाम्॥ **19** ॥

॥ छत्रबन्धः ॥

मारजनीनीतापातु
    मान्यायाभुवनेऽत्रतु।
वनीभुवमिहक्रान्ता
    वनीवलयगत्यन्ता॥ **20** ॥

॥ कमलबन्धः ॥

याचगोकुलपेशाया
    याशापेशान्तिदा च या।
याचदा च सदामेया
    यामेदा श्रीशगोचया॥ **21** ॥




**छत्रबन्धः**

इतिरङ्गकृपानिवहाद्ग्रथितां
    मतिरङ्गनटींकमलाकवितां।
सुखबोधकरींसुकरांपठतात्
    सततंजनताऽहितपापहरीम्॥ 22 ॥

॥ इति श्री कमलाधोदक स्तोत्रं समाप्तम्॥




**कमलबन्धः**